**संस्कृतवार्ता:**

**दिनाङ्क :-20.09.2024**

**प्रात: - 06:55**

**<u>अथ वार्ताः</u>**

**<u>राष्ट्रपतिः राँचीनगरम्</u>**

**राष्ट्रपतिः द्रौपदी मुर्मुः अद्य रांचीनगरे नामकुमइत्यत्र राष्ट्रीय-माध्यमिक-कृषि-संस्थानस्य शतवार्षिकं समारोहं सम्बोधयिष्यति। राष्ट्रपतिः अत्रावसरे विशिष्टमेकं प्रैष्यावरणपत्रस्य प्रैष्य-मुद्रायाश्च अनावरणं करिष्यति। एतस्मिन् समारोहे राज्यपालः सन्तोषकुमारगङ्गवारः केन्द्रीय-कृषिकृषक- कल्याणमन्त्री शिवराजसिंह चौहानः रक्षाराज्यमन्त्री सञ्जयसेठः मुख्यमन्त्री च हेमन्त सोरेनः उपस्थिताः भविष्यन्ति।**

**<u>प्रधानमन्त्री-वर्धायात्रा</u>**

**प्रधानमन्त्री नरेन्द्रमोदी अद्य महाराष्ट्रस्य वर्धास्थलस्य यात्रां करिष्यति। तत्रासौ राष्ट्रिय-प्रधानमन्त्रि-विश्वकर्मा-कार्यक्रमे भागं भजिष्यति। कार्यक्रमावधौ प्रधानमन्त्री प्रधानमन्त्रि-विश्वकर्मा-लाभार्थिभ्य: प्रमाणपत्राणि ऋणं च प्रदास्यति। तदनु श्रीमोदी महाराष्ट्रस्यैव अमरावती-जनपदे पीएम-मेगा-इण्टीग्रेटेड-टेक्सटाइल्स-रीजन्स-एण्ड-अपैरल इत्याख्यस्य उद्यानस्य आधारशिलां संस्थापयिष्यति।**

**प्रधानमन्त्री महाराष्ट्र-सर्वकारेण प्रतिष्ठितायाः आचार्य-चाणक्य-कौशल-विकास-केन्द्र-योजनायाश्चापि शुभारम्भं करिष्यति। अनया योजनया राज्यस्य पञ्चदश आयुतः पञ्चचत्वारिंशत्-आयुपर्यन्तं युवानः लाभान्वितः भविष्यन्ति। श्रीमोदी पुण्यश्लोक-अहिल्यादेवी-होल्कर-महिला-नवाचार-योजनायाः अपि शुभारम्भं विधास्यति।**

-

## जम्मूकश्मीरं-प्रधानमन्त्री

भाजपेतिदलीयः वरिष्ठो नेता प्रधानमन्त्री नरेन्द्रमोदी च न्यगादीत् यत् यावत् भारतीयजनतापार्टीतिदलं शासनारूढं विद्यते तावत् पृथिव्यां काऽपि शक्तिः जम्मूकश्मीरे अनुच्छेदं सप्तत्यधिक-त्रिशतम् अनुच्छेदं पञ्चत्रिंशत् अ इत्येतौ पुनः आनेतुं न शक्नोतीति। ह्यः कटरा-श्रीनगरयोः नैर्वाचनिक-जनसभाः सम्बोधयता प्रधानमन्त्रिणा निगदितं यत् आविश्वं पश्यति यत् कथं जम्मूकश्मीरे निवसद्भिः जनैः लोकतन्त्रं प्रबलीक्रियते।

## श्रीमोदिनः तृतीयकालं

मोदीप्रशासनेन निज-तृतीय-कार्यकालस्य शतदिनानि पूरितानि। शतदिवसावधौ प्रशासनेन अनेन कृषक-मध्यमवर्ग-महिला-युव-इत्यादिभ्यः सम्बद्धविचारेभ्यः पञ्चदश-लक्ष-कोटि रूप्यकाणां परियोजनाः समाखधाः। प्रशासनेन स्वास्थ्य-आधारभूतशिक्षा-सौविध्ययोः कृतेऽपि अनेके पदक्षेपाः उत्थापिताः।

## विदेशमन्त्रालय: प्रधानमंत्री अमेरिका यात्रा

प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीयायां संयुक्त-राज्य-अमेरिकादेशस्य यात्रायां मासस्यास्य एकविंशतित: त्रयोविंशति-दिनाङ्कपर्यन्तं गमिष्यति। ह्यः नवदिल्ल्यां वार्ताहरान् सूचयन् विदेशसचिव: विक्रममिस्री अवोचत् यत् अस्मिन् यात्रावधौ श्रीमोदी नैकेषु द्विपक्षीयेषु बहुपक्षीयेषु च विषयेषु चर्चां कुर्वन् विभिन्नै: वैदेशिकनेतृभि: हितधारकैश्च सह परामर्शं विधास्यति। तेनोक्तं यत् अवसरेऽस्मिन् श्रीमोदी कतिपयैः उद्योपतिभि: सममपि मेलनं करिष्यति। श्रीमोदी एकविंशे दिनाङ्के डेलावेरनगरस्य विलमिंगटन इत्यत्र चतुर्थे क्वाड्-सम्मेलने च भागं भजिष्यति। अथ च प्रधानमन्त्री अमेरिकादेशे भारतीयप्रवासीभिः सह संवादं विधास्यति।

श्रीमिस्री अग्रे प्रावोचत् यत् श्रीमोदिनः जापान-ऑस्ट्रेलिया-देशयोः नेतृभिस्साकमपि द्विपक्षीयोपवेशनानि सुनिश्चितानि सन्ति। तदनु प्रधानमन्त्री सोमवासरे संयुक्तराष्ट्रे शिखर-सम्मेलनार्थं न्यूयॉर्कनगरं प्रति यास्यति।

## स्पर्धा

भारोत्तोलनप्रतिस्पर्धायां भारतस्य सप्तदशवर्षीयः धनुष-लोगनाथन इत्येषः स्पेनदेशस्य लिओननगरे पुरुषाणां पञ्चपञ्चाशत् किलोग्राममितभारवर्गीयां कनिष्ठ-विश्व-भारोत्तोलन-प्रतिस्पर्धायां कांस्यपदकं समर्जितवान्।